# Bharatiya Janatantra Upalabdhaya

# ભારતીયજનતન્ત્રોપલબ્ધય

## Document Information

Text title : Bharatiya Janatantra Upalabdhaya

File name : bhAratIyajanatantropalabdhaya.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ભારતીયજનતન્ત્રોપલબ્ધય

(ઉપજાતિવૃત્તમ્)

યલ્લોકતન્ત્યોદ્ધરણાય હૃદ્યં
    પ્રક્રાન્તમાસીજ્જનતા હિતાય ।
આયોજનં પઞ્ચ-સુવર્ષ મૂલં
    સાફલ્યમાપ્તં સુખ-શાન્તિ-વૃદ્ધ્યૈઃ ॥

કૃષૈર્વિકાસાય નવપ્રયોગૈઃ
    યન્ત્રૈર્નવૈઃ ક્રાન્તિ-સમુદ્ભવોઽભૂત્ ।
હરિચ્છન્દ-ક્રાન્તિ-સમુન્નયાર્થં
    વિધિર્નૂતના લોક મનોહરોઽભૂત્ ॥

યત્રાપિ કુત્રાપિ કૃષેસ્તુ યોગ્યા
    ભૂમિર્દૃશોર્ગોચરતામયાસીત્ ।
રાજ્યેન સઙ્ગૃહ્ય તથાવિધા ભૂઃ
    કૃષૌ પ્રયુક્તાઃ જનતા-સમૃદ્ધ્યૈઃ ॥

સસેચનાર્થં પરિયોજના યા
    યુક્તા પ્રયુક્તાશ્ચ વિભિન્નભાગે ।
ક્રાન્તિ કૃષૌ હર્ષ-સમુદ્ભવશ્ચ
    વ્યલોકિ લોકૈર્જન-માનસેષુ ॥

ઉદ્યોગ-ક્ષેત્રે નવ-પારપત્રમ્ ।
    પ્રદાન-કાર્યસ્ય વિધિ ઋજૂકૃત્ ।
યેનાત્મ-નૈર્ભૈર્ય-સમાશ્રયેણ
    વિકાસ-કાર્યં-પ્રગતિ પ્રરુઢા ॥

યચ્ચાર્યભટ્ટો ગગને ચકાસન્
    ભૂપગ્રહો ભાતિ શ્રયન્ સુકીર્તિમ્ ।
સ ભારતીયાય-જનસ્ય લોકે

વૈજ્ઞાનિકીમુન્નતિમાતનોતિ ॥

યદ્ ભારતીયૈઃ પરમાણુ અસ્ત્ર-
પરીક્ષણે યા કૃતિતા ત્વદર્શિઃ ।
વૈજ્ઞાનિકાનાં ગરિમાણમેતદ્
લોકત્રયેઽપિ પ્રથયત્યજસ્ત્રમ્ ॥

વિદ્યુદ્ગૃહાણામણુ ચાલિતાનાં
સંસ્થાપનં ભારત-ગૌરવાય ।
ફ્રિગેટ-નામ્ના જલ-પીતકાનાં
નિર્માણમિષ્ટા શ્રિયમાદધાતિ ॥

ઔદ્યોગિકં પ્રાપયિતું વિકાસં
સંયન્ત્રકાણીહ પ્રવર્તિતાનિ ।
સલૌહ વૃદ્ધ્યૈ પરિશોધનાર્થં
તૈલસ્ય, ચૈવોવરકસ્ય દેશે ॥

યા ચાપ્યપૂર્વા સમુપાગતા શ્રી
ભવ્યં નવં ભારતવર્ષમેતત્ ।
બઙ્ગાહવે પાક-ચમૂ દલન્તઃ
સ્થલે જલે વ્યોમ્નિ ચ સર્વતોઽપિ ॥

પાકૈર્વિપાકો યુધિ યશ્ચ લબ્ધઃ
સ્વક્રુર કૃત્યસ્ય નૃશંસતાયાઃ ।
પૈશાચિકં ચાચરિતં જઘન્યં
કૃત્યં ફલં તત્ તનુતેઽનુરૂપમ્ ॥

વઙ્ગીય-બાલા વનિતા નરાશ્ચ
સપીડિતા શાન્તિલવં ન તેષુ ।
અવાપ્ય તે ભારત-ભૂ-સુસખ્યં
સ્વાતન્ત્ર્યમાપ્તા વિનયાવનમ્રા ॥

લક્ષાધિકા પાકચમૂચરાઃ યે
યોધા ગૃહીતાઃ વિવશાઃ વિવર્ણાઃ ।
લબ્ધં ફલ તૈર્નિજ-ધૃષ્ટતાયાઃ
તે ચાન્વભૂવન્ નરકં પૃથિવ્યામ્ ॥

યશ્ચાપિ સન્ધિ શિમલા-પ્રદેશે
    દેશં-દ્વયેઽભૂદ્ જનતા-હિતાય ।
આશ્રિત્ય તં ભારત-પાક-દેશૈઃ
    સબન્ધ-સામાન્યમુપાગતં ચ ॥

આદૃત્ય લોકસ્ય વિચાર-જાતં
    પ્રાન્તા નવીના વિહિતાશ્ચ કેચિત્ ।
મેઘાલયશ્ચ અરુણાચલશ્ચ
    મણે પુરં ચ ત્રિપુરાભિધાનમ્ ॥

સઞ્ચિન્ત્ય દેશૈક્યમવેક્ષ્ય નીતિં
    રાજ્યં ગૃહીતં સિખ્મિમાભિધાનમ્ ।
સંપ્રેક્ષ્ય ચૈવ જનતા-મતં તુ
    અભૂદિદં ભારત-ભૂમિ-ભાગમ્ ॥

યલ્લોકતન્ત્રં, નિરપક્ષિતા ચ
    ધર્મે, વ્યવસ્થા વિનિયોજિતાઽર્થે ।
સામાજિકી સ્યાત્ પ્રગતિ પ્રરૂઢા
    સૈવાઽઽથિતા નીતિરદૃમ્રભાવાત્ ॥

શાન્તિઃ સ્વદેશે, પ્રગતિર્વિકાસે,
    મૈત્રી વિદેશૈઃ, કરુણાઽઽર્તદેશે ।
નિર્ભીન્તાઽજૌ, વિમતિર્વિરોધે,
    સર્વોદયા નીતિરુપાસ્યતે ચ ॥

અર્થ-વ્યવસ્થા સુવિરૂઢ-મૂલા
    કર્તું શ્રિતા નીતિરુદાર-ભાવા ।
લોકાશ્રયોદ્યોગ-પરમ્પરાણાં
    અગ્રેસરત્વં પ્રતિપાદિતં ચ ॥

રાષ્ટ્રીકૃતા કેચન લબ્ધવર્ણાઃ
    ઉદ્યોગજાતા નૃહિતં સમીક્ષ્ય ।
સમાથિતા ચ સુવિધા સમસ્તા
    રાજ્ઞા સમત્વં પ્રતિપાદનાર્થમ્ ॥

અવર્ષણાદે કૃષિ-કાર્ય-જાતે
    રુદ્ધો વિકાસો જન શોષણાય ।

હરિચ્છદં-ક્રાન્તિમુપાસ્ય સર્વો
    રોધોષ્વરુદ્ધં કૃષકાર્થ સિદ્ધ્યે ॥

મુદ્રા-ગત-સ્ફીતિ નિવારણાર્થં
    સમાશ્રિતાશ્ચ બહવો હ્યુપાયાઃ ।
સાફલ્ય-લાભાદ્ જનતા-મનઃસુ
    વિશ્વાસ-ભાવોદય-વૃદ્ધિરાસીત્ ॥

ઉદ્યોગ-કૃત્યે કૃષિ-કાર્ય-જાતે
    નિરન્તરં વૃદ્ધિમુપૈતિ રાષ્ટ્રમ્ ।
પ્રવર્તિતે યોજન-કાર્ય-જાતે
    વ્યલોકિ લોકકૈરુદયં સમસ્તૈઃ ॥

કઠોર-દણ્ડાશ્રયણેન રાષ્ટ્રે
    વિલોક્યતે સંયમ-વૃદ્ધિરિષ્ટા ।
શાન્તિર્વ્યવસ્થા સ્વનુશાસનં ચ
    તાપાર્ત-લોકે ધૃતિમાદધાતિ ॥

ઉન્મૂલિતાસ્તે ઋણજાશ્ચ બન્ધાઃ
    પ્રણાંશિતં શોષિત-શોષણં ચ ।
દીનાર્ત-લોકોદ્ધરણં સમીક્ષ્ય
    ભૂમિં પ્રદિષ્ટા સુખ-વાસ-હેતોઃ ॥

આક્રામકાઃ યેઽવિરતઃ યતન્તે
    દેશા અશેષા અહિતં નિરીક્ષ્ય ।
તેષાં વિમર્દાર્થમભીષ્ટ સાધની
    નૃ-વાહિનીં સિંહ-સમ-ક્રમાઽઽસ્તે ॥

સઞ્ચાર કાર્યે વિપુલા વિવૃદ્ધિઃ
    ઇષ્ટા વિશિષ્ટા પ્રગતિં તનોતિ ।
દૂરેક્ષણે દૂર-પ્રભાષણે ચ
    સમુન્નતિં કસ્ય મુદં ન ધત્તે ॥

ગ્રામેષુ પુર્યાં નગરેષુ ચૈવ
    ચિકિત્સકાનાં ભિષજા નિયુક્તિઃ ।
આરોગ્ય-હેતોર્નવ-યન્ત્ર-વૃદ્ધિઃ
    શય્યા-વિવૃદ્ધિશ્ચ હિતં તનોતિ ॥

શિક્ષા-પ્રસારાય પ્રવર્તિતાશ્ચ
    રાજ્યેષુ નૂત્ના વિવિધા હ્યુપાયાઃ ।
શુલ્ક-પ્રમુક્તિઃ-બ્ર્બુક-બૈઙ્ક-યુક્તિઃ
    પ્રોત્સાહનાર્થં બહુ-છાત્રવૃત્તિઃ ॥

સ્ત્રીણા ચ યૂનાં ચ હિતાય પ્રેષ્ઠા
    કાર્યક્રમાઃ શાસન-દિષ્ટ-રુપા ।
એવં પ્રદૃષ્ટા નવ-યોજનાન્તે
    સમુન્નતિં સર્વ દિગાશ્રયાઃ સા ॥

Proofread by Mandar Mali

*Bharatiya Janatantra Upalabdhaya*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*